क्रमार्थं गोतमवचनम्। स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानाञ्च। प्रथममप्रत्तानां तदभावे प्रत्तानां तदभावे समूढ़ानाम्। स्त्रीधनं दुहितॄणामितिसामान्यतः प्राप्तत्वात्। अप्रत्तानामित्यादेस्तु क्रमार्थत्वात्। तथा, याज्ञवल्क्यः।

‘अप्रजःस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि।
दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥’

तत्र ब्राह्मादिषु विवाहेषु यल्लब्धमध्यग्निधनं स्त्रिया तत् तस्यां मृतायां प्रथमं दुहितॄणामेव तत्रापि प्रथमं कन्यायास्तदभावे प्रत्तायास्तदभावे परिणीतायाः सर्व्वदुहित्रभावे च पुत्त्रस्याधिकारः अप्रजःस्त्रीधने भर्त्तुरधिकारात्। बृहस्पतिना अप्रत्तापदेन अप्रत्ताद्यभावे समूढ़ाया अप्यधिकारः सूचितः।

‘ब्राह्मदैवार्षगान्धर्व्वप्राजापत्येषु यद्धनम्।
अप्रजायामतीतायां भर्त्तुरेव तदिष्यते॥
यत्त्वस्याः स्याद्धनं दत्तं विवाहेष्वासुरादिषु।
अतीतायामप्रजायां मातापित्रोस्तदिष्यते॥’

अस्याः स्याद्दत्तमिति पराचीनं पूर्ब्बत्रानुषज्यते। तेन विवाहेषु यद्धनं दत्तमिति सम्बन्धात् वैवाहिकधनमात्रप्रतीतेर्न यावद्धनविषयत्वम्। तथा यमः।

‘आसुरादिषु यद्द्रव्यं विवाहेषु प्रदीयते॥’

विवाहक्रियायां पूर्ब्बापरीभूतायां यद्द्रव्यं प्रदीयते इति यौतकधनमात्रगोचरत्वमेव प्रतीयते।” इति दायभागः॥*॥ “ऊढ़ाया यौतकधने प्रथमं कुमारी तदभावे वाग्दत्ता अधिकारिणी। एतयोरभावे ऊढ़योः पुत्त्रवतीसम्भावितपुत्त्रयोर्युगपदधिकारः। एकाभावे चापरायाः। एतयोरभावे बन्ध्याविधवयोस्तुल्याधिकारः। एकाभावे चापरायाः। ततः पुत्त्रदौहित्रपौत्त्रप्रपौत्त्रसपत्नीपुत्त्रपौत्त्रप्रपौत्त्राणां क्रमेणाधिकारः। ग्रन्थकृन्मते सपत्नीपुत्त्रानन्तरं दौहित्रस्याधिकार इति विशेषः। ततो ब्राह्मादिविवाहपञ्चकसमयलब्धयौतकधने भर्त्ता भ्राता माता पिता चेति क्रमः। आसुरादिविवाहत्रयसमयलब्धयौतकधने माता पिता भ्राता भर्त्ता चेति क्रमः। ततो देवरः ततो देवरपुत्त्रभर्त्तृश्वशुरपुत्त्रौ भगिनीपुत्त्रः ततो भर्त्तृभागिनेयः ततो भ्रातृपुत्त्रः ततो जामाता ततः श्वशुरः ततो भ्रातृश्वशुरः तत आनन्तर्य्यक्रमेण सपिण्डाः ततः सकुल्याः ततः समानोदकाः।” इति तट्टीकायां श्रीकृष्णतर्कालङ्कारः॥

यौधिष्ठिरं, त्रि, ( युधिष्ठिरस्य इदमिति। युधिष्ठिर + अण्। ) युधिष्ठिरसम्बन्धि। यथा,—

“सा च यौधिष्ठिरी सेना गाङ्गेयशरताड़िता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥”

इति महाभारतम्॥

( युधिष्ठिरस्यापत्ये, पुं। यथा, महाभारते। ६।५०।५६।

“यौधिष्ठिरः सुसंक्रुद्धः यौवनं निशितैः शरैः।
व्यदारयत संग्रामे मघवा इव दानवम्॥”

वासुदेवस्य पत्नीविशेषे, स्त्री। यथा, हरिवंशे। १६०। २०—२१।

“कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिरः।
कापाली गरुड़श्चैव जज्ञाते चित्रयोधिनौ॥
एवमादीनि पुत्त्राणां सहस्राणि निबोध मे।
दशायुतं समाख्याता वासुदेवस्य ते सुताः॥”)

यौधेयः, पुं, ( योधमर्हतीति। योध + ढञ्। यद्वा, “पार्श्वादियौधेयादिभ्यामणञौ।” ५।३।११७। इति स्वार्थे अञ्। ) योद्धा। इति सिद्धान्तकौमुदी॥ (युधिष्ठिरपुत्त्रः। स च शैव्यराजदौहित्रः। यथा, महाभारते।१।९५।७६।

“युधिष्ठिरस्तु गोवासनस्य शैव्यस्य देविकां नाम कन्यां स्वयम्वरे लेभे। तस्यां पुत्त्रं जनयामास यौधेयं नाम॥” नृगराजपुत्त्राः यौधेया इति ख्याताः। यथा, हरिवंशे।३१।२५।

“दृषद्वत्यास्तु संजज्ञे शिविरौशीनरो नृपः।
शिवेस्तु शिवयस्तात! यौधेयास्तु नृगस्य ह॥”)

यौनं, क्ली, ( योनेरिदमिति। योनि + अण्। ) योनिसम्बन्धाधीनपापम्। यथा। बौधायनः।

“संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनात् सद्यो हि शयनाशनात्॥”

सुमन्तुः। यश्चैतैर्यौनमौखस्रौवादीनां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यादिति। इयात् कुर्य्यात्। एतदेवेति द्वादशवार्षिकमित्यर्थः। अत्र याजनादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते। इति प्रायश्चित्तविवेकः॥ ( उत्पत्तिकारणम्। यथा, महाभारते।१३।१०२।२५।

“यत्राग्नियौनाश्च वसन्ति लोका
अब्योनयः पर्व्वतयोनयश्च॥”

उत्तरापथजातजातिविशेषे, पुं। यथा, महाभारते।१२।२०७।४३।

“उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि।
यौनकाम्भोजगान्धाराः किराता वर्व्वरैः सह॥”)

यौवतं, क्ली, ( युवतीनां समूहः। युवति + “भिक्षादिभ्योऽण्।” ४।२।३८। इति अण्। पुंवद्भावाभावश्च।) युवतिसमूहः। इत्यमरः।२।६।२२॥ ( यथा, गीतगोविन्दे। १०।१५।

“रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवतं वहसि तन्वि! पृथ्वीगता॥”

युवतिभिः कृतमिति। नृत्यविशेषः। यथा, सङ्गीतदामोदरे।

“मधुरं बहुलीलाभिर्नटीभिर्यत्र नृत्यते।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम्॥”)

परिमाणम्। इति अमरटीकायां भरतः॥

यौवनं, क्ली, (युवन् + “हायनान्तयुवादिभ्योऽण्।” ५।१।१३०। इति अण्।) यूनो भावः। तत्पर्य्यायः। तारुण्यम् २। इत्यमरः॥ वयः ३ इति जटाधरः॥ तत्तु षोड़शवर्षमारभ्य सप्ततिवर्षपर्य्यन्तम्। यथा,—

“आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम्॥”

इति स्मृतिः॥

नवयौवनलक्षणं यथा,—

“दरोद्भिन्नस्तनं किञ्चित् चलाक्षं मेदुरस्मितम्।
मनागभिस्फुरद्भावं नव्यं यौवनमुच्यते॥”

इत्युज्ज्वलनीलमणिः॥

(“गर्भेश्वरत्वम् अभिनवयौवनत्वमप्रतिरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्व्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्म्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्त्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु।” इति कादम्बर्य्यां चन्द्रापीड़ं प्रति शुकनाशोपदेशः॥)

नवयौवनकारकमौषधं यथा,—

“अश्वगन्धानागबलागुड़मांसनिषेविणाम्।
रूपं भवेद्यथा तद्वत् नवयौवनचारिणाम्॥”

इति गारुड़े १९६ अध्यायः॥

यौवनकण्टकं, पुं, क्ली, ( यौवने कण्टकमिव दुःखदत्वात्। ) युवगण्डः। इति शब्दमाला वयस्फोड़ा इति भाषा॥

यौवनपिड़का, स्त्री, ( यौवने पिड़का। ) युवकानां मुखे जातः क्षुद्रस्फोटकः। वयस्फोड़ा इति भाषा॥ ( यथा, सुश्रुते निदानस्थाने।१३।

“यौवनपिड़का पद्मिनी कण्टका जतुमणिरित्यादि॥”) तल्लक्षणं यथा,—

“शाल्मलीकण्टकप्रख्याः कफमारुतशोणितैः।
जायन्ते पिड़का यूनां वक्त्रे या मुखदूषिकाः॥”

इति सुश्रुते।१।१४ अध्यायः॥

अस्याश्चिकित्सा मुखदूषिकाशब्दे द्रष्टव्या॥

यौवनलक्षणं, क्ली ( यौवनस्य लक्षणं चिह्नम्। ) लावण्यम्। स्तनः। इति मेदिनी। णे, ११७॥ तारुण्यचिह्नम्॥

यौवनाश्वः, पुं, (युवनाश्वस्यापत्यमिति। युवनाश्व + अण्। ) मान्धातृराजः। इति त्रिकाण्डशेषः॥ अपि च।

“यौवनाश्वोऽथ मान्धाता चक्रवर्त्त्यवनीपतिः।
सप्तद्वीपवतीमेकः शशासाच्युततेजसा॥
ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः॥
सर्व्वदेवमयं देवं सर्व्वात्मकमतीन्द्रियम्॥
द्रव्यं मन्त्रो विधिर्यज्ञो यजमानस्तथर्त्विजः।
धर्म्मो देशश्च कालश्च सर्व्वमेतद्यदात्मकम्॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
तत् सर्व्वं यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते॥